**अधःकाय** पु० अधः अधरं कायस्य एकदेशिस०। नाभेरधःप्रदेशे नेत्यनुवृत्तौ "केशान्नीविमधःकायं संस्पृशन् धरणीमपीति" स्मृतिः । "अधःकायं नीवेरधःप्रदेशमिति" रघु०।

**अधःकार** पु० अधरमित्यर्थे अधः तस्य कारः । न्यूनीकरणे, तिरस्कारे, अधरीकरणे च ।

**अधःक्षिप्त** त्रि०अधोमुखेन क्षिप्तम् क्षिप-क्त शाक०त०। अधोमुखतया स्थापिते न्यञ्चिते न्युब्जीकृते,ऽधस्तान्निहिते च ।

**अधःपुष्पी** स्त्री अधोमुखं पुष्पं यस्याः (अनन्तमूल) गोजिह्वायाम् अशाक्पुष्प्याम् (भाटुइ) इति ख्याते वृक्षे इत्यन्ये।

**अधः(धस्)शय्या** स्त्री अधोवर्त्तिनी शय्या वा सत्वम् । खट्वावर्जनेन भूमिशय्यायाम् "अग्नीन्धनं ब्रह्मचर्य्यमधःशय्यां गुरोर्हितम् । आ समावर्त्तनात् कुर्य्यादिति" मनु०।

**अधन** त्रि० नास्ति धनमस्य । धनहीने दरिद्रे स्वातन्त्र्यरहिते च । "अधनो हि धनं लब्ध्वा तृणवत् मन्यते जगदिति" नीति०। "भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनमिति" मनुः । "स्वातन्त्र्यराहित्यपरमिति" दायभागः ।

**अधम** त्रि० अव-अम-धादेशः । कुत्सिते, हीने च । "सर्व्वत्र त्रिविधा भेदा उत्तमाधममध्यमा" इति । "अधमसमवरिष्ठान्यर्ककेन्द्रादिसंस्थे शशिनि विनयवित्तज्ञानधीनैपुणानामिति" ज्योतिषोक्ते नृणां वित्तज्ञानादिषु अधमत्वसूचके रविचन्द्रयोः स्थितिविशेषरूपे योगभेदे ।

**अधमभृतक** पु० कर्म्म० । "उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः । अधमो भारवाही स्यादित्येवं त्रिविधो भृत इति" स्मृत्युक्ते, पञ्चविधशुश्रूषकमध्ये भृतकभेदे ।

**अधमर्ण** त्रि० ऋणं अवश्यदेयम् तत् अधमं शोध्यं यस्य ब० । अवश्यदेयर्णशोधके (खातक) इति प्रसिद्धे ऋणग्रहीतरि ।

**अधमर्णिक** त्रि० अधमस्तृणमवश्यदेयं दातृत्वेनास्त्यस्य ठन् । अधमर्णशब्दार्थे । "ग्रहीता च क्रमाद्दाप्यो धनिनामधमर्णिक" इति याज्ञ० "यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः । तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकमिति"मनुः। अस्त्यर्थे इनि । अधमर्णीत्यप्यत्रैव त्रि० स्त्रियां ङीप् ।

**अधमाङ्ग** न० अधमम् अङ्गम् कर्म्म० । चरणे । तस्य सर्व्वाङ्गापेक्षया अधरस्थत्वात् अधमत्वम् ।

**अधमार्द्ध** न० अधममर्द्धम् । नाभेरधोभागे । ततः भवादौ यत् । अधमार्द्ध्यम् तद्भवादौ, तत्सम्बन्धिनि च त्रि० ।

**अधर** पु० न ध्रियते धृङ-अच् न०त० । (ठोट) इति ख्याते ऊर्द्ध्वे, नीचे वा ओष्ठे । "पिबसि रतिसर्वस्वमधरमिति" शकु० । "निर्दृष्टरागोऽधर" इति सा०दर्प० । "उमामुखे विम्बफलाधरोष्ठे" इति कुमा० । "अधरं खलु विम्बनामकं फलमाभ्यामिति भव्यमन्वयम् । लभतेऽधरविम्बइत्यदः पदमस्या रदनच्छदे वददिति" नैष० । धरणं धरः ब० । तत्सम्बन्धरहिते हीने, ५ब०। तले, नीचे च स्मरमन्दिरे स्त्रीचिह्नभेदे पु०न० । हीनवादिनि त्रि० । अयं सर्वनामकार्य्यभाक् । तत्रायं विशेषः पूर्व्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायामिति (पा०ग०) । इत्युक्तेः व्यवस्थायामेवास्य सर्वनामताव्यवस्था च स्वाभिधेयापेक्षोऽवधिनियमः । अवधित्वञ्च दैशिकं कालिकञ्च तत्र "पूर्व्वापरादिशब्दानां केषाञ्चित् प्रविभागतः। सामान्येनाभिधानेऽपि प्रवृत्तिर्देशकालयोरित्य"भियुक्तोक्तेः केषाञ्चिदेव उभयावधित्वनियमः न सर्वेषाम्, तथाहि पूर्व्वापरावरपरोत्तरशब्दा मुख्यवृत्त्या दिक्कालयोर्वर्त्तन्ते तदवच्छिन्नदेशग्रामादौ च । तत्र पूर्व्वस्यां दिशि वसति, पूर्व्वस्यादिश आगतः पूर्बदिक्सम्बन्धात् पूर्व्वा वापी । एवं पूर्व्वस्मिन् मासे वसति पूर्व्वस्मात् मासान्निवृत्तः। तत्कालसम्बन्धात् पूर्व्वो गुरुः पूर्व्वस्मिन् गुरोरागतः पूर्व्वस्मात् प्रासादादागत इत्यादि । एवम् अपरावरपरशब्दत्रयस्यापि "ते च विनापि दिक्कालसम्बन्धं देशवृत्तिमन्तः इति भेदः। अपरदेशसम्बन्धादपरो ग्रामः अवरो वा । अपरस्मिन् अवरस्मिन् वा पर्व्वते वसति । सन्निकर्षे विप्रकर्षे च सर्व्वासु दिक्षु तुल्योऽयं व्यपदेशः । न तु ते दिग्गतसम्बन्धेन तत्तदर्थबोधकाः एकस्यामेव दिशि स्थितयोर्निकटानिकटयोः परावरादिव्यपदेशप्रवृत्तेः । एतच्छब्दापेक्षया मुख्यवृत्त्या वक्ष्यमाणकारिकायां देशग्रहणम् सार्थकं अन्यस्य तु स्वतो देशवृत्तित्वम् । सन्निकर्षासन्निकर्षयोर्देशवत् कालोऽप्याश्रयः । तेन परः अपरः अवरो वा कालः । अतएव परकालसम्बन्धात् परःपाणिनिः अपरकालसंबन्धादपरः कैयटादिरिति । दक्षिणाधरशब्दौ तु दिशि दिगवच्छिन्ने पर्वतादौ च वर्त्तेते न तु काले, नापि कालावच्छिन्ने इति भेदः । दक्षिणस्यां वसति, दक्षिणे पर्वते वा वसति, अधरस्यां दिशि वसति अधरदिक्सम्बन्धात् अधरप्रासादे वा वसति इति । तेन "स्वस्वज्ञातिधनेऽनाम्नि कालदिग्देशवृत्तयः । पूर्व्वापरावरधरापराश्च दक्षिणोत्तरौ" इति गणरत्ने सर्वेषां कालादिवृत्तित्वोक्तावपि दक्षिणाधरयोस्तु न कालवृत्तित्वमिति तेनैव स्वकृतव्याख्यानरूपे गणरत्नमहोदधौ स्थिरीकृतम् । दक्षिणस्यां दिशि